दिनाङ्कः __________

# डी.ए.वी. पब्लिकविद्यालयाः, दिल्ली-एन.सी.आर.

## आदर्शप्रश्नपत्रम् (2025-2026)

**अर्धवार्षिक-परीक्षा**

**कक्षा – षष्ठी**

**विषयः - संस्कृतम्**

**समयः - होरात्रयम्** **पूर्णाङ्काः - 80**

**निर्देशाः -**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. अस्मिन् प्रश्नपत्रे 8 पृष्ठानि 21 प्रश्नाः च सन्ति।
3. निर्देशान् ध्यानेन पठित्वा प्रश्नान् उत्तरत।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन एव लेखनीयानि।
5. प्रश्नपत्रं पठनाय 15 निमेषाः सन्ति।

**खण्डः - क**

**अपठित - अवबोधनम् 10 अङ्काः**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

मनुष्यस्य जीवने अनुशासनम् आवश्यकम्। छात्रजीवने तु अनुशासनस्य अत्यधिकं महत्त्वं भवति। अतः अनुशासनम् अवश्यं पालनीयम्। छात्राः प्रातः व्यायामं स्नानं च कुर्वन्ति। ततः ते प्रातराशं कृत्वा विद्यालयं गच्छन्ति। विद्यालये आचार्यान् नत्वा पाठं पठन्ति। ते कक्षाकार्यं गृहकार्यं च समयेन कुर्वन्ति। प्रतिदिनं व्यायामः अवश्यं करणीयः। व्यायामेन शरीरं स्वस्थं भवति। ये छात्राः अनुशासनस्य पालनं कुर्वन्ति। ते जीवने सफलाः भवन्ति।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )** 1×2=2

(i) जीवने किम् आवश्यकम् ?

(ii) छात्राः कस्य पालनं कुर्वन्ति ?

(iii) छात्राः कुत्र गच्छन्ति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** 2×2=4

(i) जीवने के सफलाः भवन्ति ?

(ii) छात्राः प्रातः किं कुर्वन्ति ?

(iii) केन शरीरं स्वस्थं भवति ?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)** 1×4=4

(i) 'मानवस्य' इति पदस्य किं पर्यायपदम् ?

(क) व्यायामेन (ख) पाठम् (ग) मनुष्यस्य (घ) शरीरम्

(ii) 'अस्वस्थम्' इति पदस्य किं विलोमपदम् ?

(क) स्वस्थम् (ख) अवश्यम् (ग) पालनम् (घ) अनुशासनस्य

(iii) 'छात्राः अनुशासनस्य पालनं कुर्वन्ति।' अत्र किं कर्तृपदम् ?

(क) कुर्वन्ति (ख) छात्राः (ग) अनुशासनस्य (घ) पालनम्

(iv) 'ते जीवने सफलाः भवन्ति।' अत्र किं क्रियापदम् ?

(क) जीवने (ख) ते (ग) भवन्ति (घ) सफलाः

(v) 'व्यायामेन शरीरं स्वस्थं भवति।' अत्र किं विशेषणपदम् ?

(क) भवति (ख) शरीरम् (ग) स्वस्थम् (घ) व्यायामेन

## खण्डः - ख

**रचनात्मककार्यम्** **15 अङ्काः**

**2. अधोलिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पूर्णं पत्रं लिखत-** **1×5=5**

सेवायाम्,

(i) ____________!

डी.ए.वी. विद्यालयः देहली

महोदय !

(ii) ____________ निवेदनम् अस्ति यत् मम माता (iii)__________आसीत्। अस्मात् कारणात् अहं विद्यालयं न (iv)____________। अधुना सा स्वस्था अस्ति। अतः कृपया दिनद्वयस्य अवकाशं दत्त्वा अनुग्रहं करोतु। (v)____________सदा आभारी भविष्यामि।

धन्यवादः

भवतः शिष्यः

क. ख.ग.

**मञ्जूषा**

| |
|---|
| अहम्, प्राचार्यमहोदय, आगच्छम्, अस्वस्था, सविनयम्। |

**3. चित्रं दृष्ट्वा मञ्जूषायाः सहायतयां रिक्तस्थानानि पूरयत-** **1×5=5**



**मञ्जूषा**

| |
|---|
| पुष्पाणि, वृक्षः, उद्यानस्य, सूर्यः, बालकः |

(i) इदं चित्रम् __________ अस्ति।

(ii) चित्रे ________ बालिका च स्तः।

(iii) अत्र अनेकानि _________ सन्ति।

(iv) आकाशे ________ उदितः।

(v) एकः________अस्ति।

**4. रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-** 1×5=5

**यामिनी** - भो गौरव! त्वं सायं कुत्र गच्छसि?

**गौरवः** - (i)______________________________।

**यामिनी** - सायं उद्याने किं किं भवति ?

**गौरवः** - (ii)______________________________।

**यामिनी** - सायं भ्रमणेन कः लाभः अस्ति ?

**गौरवः** - (iii)____________________________। तत्र योगशिक्षकः अपि अस्ति।

**यामिनी** - जनाःयोगाभ्यासं किमर्थं कुर्वन्ति ?

**गौरवः** - (iv) ____________________________।

किं त्वम् अपि चलितुम् इच्छसि ?

**यामिनी** - (v)_______________________________।

**मञ्जूषा**

- आम्, अहम् अपि चलितुम् इच्छामि।
- सायम् उद्याने जनाः भ्रमन्ति बालाः क्रीडन्ति च।
- जनाः स्वास्थ्याय योगाभ्यासं कुर्वन्ति।
- अहं सायम् उद्यानं गच्छामि।
- सायं भ्रमणेन मनः शान्तं भवति।

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-** 1×5=5

वने एका अजा घासं चरति। तत्र एकः (i) ________आगच्छति। अजा व्याघ्रं दृष्ट्वा भयभीता भवति। सा (ii) ________धावति। व्याघ्रः अजां मारयितुम् इच्छति। तदा एका बालिका (iii) _________ आगच्छति। बालिका व्याघ्रस्य समीपं गच्छति प्रार्थनां च करोति अजां (iv) ______ मारय। अहं अजां पालयामि। व्याघ्रस्य हृदये दया (v) ________ भवति। सः अजां न मारयति।

**मञ्जूषा**

| |
|---|
| तत्र, व्याघ्रः, उत्पन्ना, दूरम्, मा |

## खण्डः - ग

### अनुप्रयुक्त - व्याकरणम्        25 अङ्काः

**5. वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धि-विच्छेदं वा कृत्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) <u>**सूर्य + अस्तः**</u> भवति।

(ii) तव <u>**देवालयः**</u> सुन्दरः अस्ति।

(iii) अहं <u>**सहायता + अर्थं**</u> मित्राणि आनयामि।

**6. निर्देशानुसारं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्)** 1x4=4

| | | |
|---|---|---|
| (i) छात्रा | प्रथमा विभक्तिः | बहुवचनम् |
| (ii) बालक | प्रथमा विभक्तिः | एकवचनम् |
| (iii) मित्र | द्वितीया विभक्तिः | द्विवचनम् |
| (iv) किम् (नपुंसकलिङ्गम्) | प्रथमा विभक्तिः | एकवचनम् |
| (v) तत् (स्त्रीलिङ्गम्) | षष्ठी विभक्तिः | द्विवचनम् |

**7. उचितं संख्यावाचकं पदं प्रयुज्य पूर्णवाक्यं लिखत - (केवलं प्रश्नत्रयम्)** 1x3=3

(i) ___________ (2) बालिके क्रीडतः।

(क) द्वे (ख) द्वौ (ग) द्वितीया (घ) द्वि

(ii) वृक्षे _____________ (4) शुकाः सन्ति।

(क) चत्वारि (ख) चत्वारः (ग) चतस्रः (घ) चतुर्

(iii) क्रीडाक्षेत्रे ___________ (22) क्रीडकाः क्रीडन्ति।

(क) द्वादश (ख) द्वाविंशतिः (ग) दश (घ) द्वे

(iv) पुराणानि______________ (18) सन्ति।

(क) अष्टाविंशतिः (ख) अष्ट (ग) अष्टादश (घ) अष्टत्रिंशत्

**8. अधोलिखितानां शब्दानां वर्णसंयोजनं वर्णविन्यासं वा लिखत -** ½x4=2

(i) ह् + ____ र् + इ + _____ + अः = हरिणः

(ii) त् + ______ + त् +_______ + अ = तत्र

(iii) अ + थ् + अ + व् + आ = _____________

(iv) उ + च् + च् + ऐः = _______________

9. अधोलिखितेषु रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत - (केवलं प्रश्नचतुष्टयम्) 1×4=4

| वाक्यम् | विभक्तिः | कारणम् |
|---|---|---|
| (i) **<u>शिक्षकं</u>** परितः छात्राः सन्ति। | | |
| (ii) **<u>उद्यानम्</u>** उभयतः जनाः भ्रमन्ति। | | |
| (iii) बालकः **<u>जनकं</u>** प्रति गच्छति। | | |
| (iv) **<u>गृहम्</u>** अभितः जलम् अस्ति। | | |
| (v) **<u>जलं</u>** विना मत्स्याः न जीवन्ति। | | |

10. निर्देशानुसारं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 1×4=4

(i) अस् - लट्लकारः - प्रथमपुरुषः - द्विवचनम् = ......................

(ii) क्रीड् - लङ्लकारः - मध्यमपुरुषः - बहुवचनम् = ......................

(iii) गम् - लृट्लकारः - प्रथमपुरुषः - बहुवचनम् = ....................

(iv) नम् - लट्लकारः - प्रथमपुरुषः - द्विवचनम् = ....................

(v) खाद् - लृट्लकारः – प्रथमपुरुषः - एकवचनम् = ....................

11. रेखाङ्कितपदेषु प्रकृति - प्रत्ययौ संयोज्य विभज्य वा लिखत - (केवलं प्रश्नद्वयम् ) 1×2=2

(i) पठ् + क्त्वा = ____________

(ii) हस् + क्त्वा = _______________

(iii) नत्वा = _________ + _________

12. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत – (केवलं प्रश्नद्वयम्) 1×2=2

(i) अहं श्लोकम् _________ गायामि।

(ii) काकः ____________ पश्यति।

(iii) ईश्वरः ___________ अस्ति।

**मञ्जूषा**

| अत्र-तत्र, अपि, सर्वत्र |
|---|

13. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत – (केवलं प्रश्नद्वयम्) 1×2=2

(i) आगच्छामि = _______ + _________

(ii) प्र + हरति = ______________

(iii) अनुवदति = ________ + _________

## खण्डः - घ

**पठित-अवबोधनम्** **30 अङ्काः**

**14. अधोलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **(5)**

अस्माकं भारतमाता वीराणां जननी अस्ति। अनेके वीरबालकाः भारतभूमौ उत्पन्नाः अभवन्। गुञ्जनसक्सेना अपि एतादृशी एका वीरबालिका उत्पन्ना अभवत्। मातृभूमेः सेवायै सा स्वजीवनस्य चिन्तां न अकरोत्। सा हंसराज - महाविद्यालयस्य छात्रा आसीत्। सा भारतीय वायुसेनां प्राविशत्। सा युद्धक्षेत्रे निर्भयं विमानम् अचालयत्। सा सैनिकान् अरक्षत्।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½×2=1

(i) का वीराणां जननी अस्ति ?

(ii) गुञ्जनसक्सेना कुत्र विमानम् अचालयत् ?

(iii) भारतभूमौ के उत्पन्नाः अभवन् ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) गुञ्जनसक्सेना कस्य महाविद्यालयस्य छात्रा आसीत् ?

(ii) गुञ्जनसक्सेना कान् अरक्षत् ?

(iii) गुञ्जनसक्सेना युद्धक्षेत्रे किम् अचालयत् ?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) 'अम्बा' इति शब्दस्य किं पर्यायपदम् ?

(क) वीराणाम्  (ख) जननी  (ग) अस्ति  (घ) आकाशः

(ii) 'एतादृशी एका वीरबालिका अभवत्।' अत्र किं क्रियापदम् ?

(क) एतादृशी  (ख) वीरबालिका  (ग) एका  (घ) अभवत्

(iii) 'सा युद्धक्षेत्रे निर्भयं विमानम् अचालयत्।' अत्र किम् कर्तृपदम् ?

(क) सा  (ख) युद्धक्षेत्रे  (ग) विमानम्  (घ) निर्भयम्

**15. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **(5)**

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः।
चन्द्रचन्दनयोः मध्ये शीतला साधुसङ्गतिः ॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदैव वक्तव्यं वचने का दरिद्रता ॥

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½×2=1

(i) जन्तवः केन तुष्यन्ति ?

(ii) लोके किं शीतलं भवति ?

(iii) वचने का न भवेत् ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) चन्दनात् अधिकः शीतलः कः ?

(ii) साधुसङ्गतिः कीदृशी भवति ?

(iii) सर्वे जन्तवः केन तुष्यन्ति ?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) लोके चन्दनं शीतलम्। अत्र किं विशेष्यपदम् ?

(क) शीतलम् (ख) लोके (ग) चन्दनम् (घ) मध्ये

(ii) 'उष्णम्' इति पदस्य किं विलोमपदम् श्लोके प्रयुक्तम्?

(क) शीतलम् (ख) जन्तवः (ग) वचने (घ) चन्दनम्

(iii) 'प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।' अत्र किं क्रियापदम् ?

(क) जन्तवः (ख) तुष्यन्ति (ग) सर्वे (घ) प्रियवाक्यप्रदानेन

**16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** (5)

**अध्यापिका** - छात्राः ! आगच्छत, अद्य वयं समुद्रतटं चलामः।

(हर्षिताः छात्राः समुद्रतटं गच्छन्ति।)

**सागरः** - मित्राणि ! तत्र पश्यत। जले बहवः विचित्राः जन्तवः वसन्ति।

**श्रुतिः** - अरे ! एकः मत्स्यः तत्र दीव्यति।

**अध्यापिका** - अयं स्वर्णिम : मत्स्यः अस्ति।

**सागरः** - किं मण्डूकः जले वसति ?

**अध्यापिका** - मण्डूकः तु जले भूमौ च उभयत्र वसति। कच्छपः कुलीरः च जले भूमौ च उभयत्र वसतः। (एकः विशालकायः मत्स्यः शार्कः जलस्य उपरि आगच्छति।)

**श्रुतिः** - शार्कः किं किं खादति ?

**अध्यापिका** - अयं लघुमत्स्यान् खादति। अयं मानवान् अपि च खादति।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½×2=1

(i) छात्राः कुत्र गच्छन्ति ?

(ii) शार्कः कस्य उपरि आगच्छति ?

(iii) विशालकाय मत्स्यस्य किं नाम अस्ति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) शार्कः कान् खादति ?

(ii) जले कीदृशाः जन्तवः वसन्ति ?

(iii) शार्क मत्स्यः किं किं खादति ?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) 'अद्य वयं समुद्रतटं चलामः।' अत्र किं कर्तृपदम् ?

(क) अद्य (ख) चलामः (ग) वयम् (घ) समुद्रतटम्

(ii) 'प्राणिनः' इति पदस्य पर्यायपदं किम् अस्ति ?

(क) जन्तवः (ख) विचित्राः (ग) मत्स्यः (घ) समुद्रः

(iii) 'नीचैः' इति पदस्य किं विलोमपदम् ?

(क) भूमौ (ख) जले (ग) आकाशे (घ) उपरि

**17. रेखाङ्कितपदानां स्थाने प्रश्नवाचकपदं चित्वा प्रश्ननिर्माणं कुरुत -(केवलं प्रश्नत्रयम् )** 1×3=3

(i) **<u>मत्स्यः</u>** जलस्य उपरि आगच्छति। (कः, कस्य, के)

(ii) मूषकः **<u>जालम्</u>** अकृन्तत्। (किम्, का, कम्)

(iii) **<u>हरिणः</u>** दूरं गच्छति। (का, किम्, कः)

(iv) मृगाः **<u>सिंहस्य</u>** मुखे न प्रविशन्ति। (कः, कस्याः, कस्य)

**18. श्लोकं पठित्वा उचितैः पदैः अन्वयपूर्तिं कुरुत -** 1×4=4

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

**अन्वयः** – कार्याणि (i) __________ हि सिध्यन्ति मनोरथैः (ii) _________ सुप्तस्य (iii) ________ मुखे (iv) _________ न प्रविशन्ति।

**मञ्जूषा**

| सिंहस्य, न, उद्यमेन, मृगाः |
|---|

**19.अधोलिखितां पठितकथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -** ½×4=2

काकः (i) _________ हरिणः कच्छपः च चत्वारि प्रियमित्राणि सन्ति। एतानि प्रियमित्राणि वने वसन्ति। एकदा हरिणः दूरम् (ii) ____________। सूर्यास्तः भवति परन्तु सः न आगच्छति। तस्य (iii) ________परस्परं वार्तालापम् कुर्वन्ति। एकः व्याधः हरिणं जालेन अबद्धत्। मूषकः जालम् कृन्तति। हरिणः (iv) ________ भवति।

**मञ्जूषा**

| गच्छति, मित्राणि, मुक्तः, मूषकः। |
|---|

**20. अधोलिखितपदानां उचितम् अर्थं मञ्जूषातः चित्वा लिखत -** 1×3=3

(i) वचने _____________

(ii) क्रीडाङ्गणे _____________

(iii) संसारे _____________

**मञ्जूषा**

| लोके, क्रीडाक्षेत्रे, भाषणे। |
|---|

**21. उचितं विपरीतार्थकपदं चित्वा लिखत -** 1×3=3

(i) असत्यम् _____________

(ii) सायंकालः _____________

(iii) मुक्तः _____________

**मञ्जूषा**

| प्रातःकालः, सत्यम्, बद्धः। |
|---|

***************

## संस्कृतम्

## अर्द्धवार्षिक-परीक्षा कक्षा-षष्ठी

**अवधिः- होरात्रयम्** **पूर्णांकाः- 80**

**(अंकविभाजनम् उत्तरसंकेतश्च)**

**निर्देशः- अस्मिन् उत्तरसंकेते लिखितेभ्यः उत्तरेभ्यः अन्यत् अपि शुद्धम् उत्तरं भवितुं शक्नोति|**

| प्रश्नसंख्या | उत्तरसंकेताः | अंक विभाजनम् | योगः |
|---|---|---|---|
| 1. | **खण्डः- क (अपठित-अवबोधनम्) 10अंकाः** | | |
| | **(1) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** | 1x2 | 2 |
| | (i) अनुशासनम् (ii) अनुशासनस्य (iii) विद्यालयम् | | |
| | **(आ)पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** | 2x2 | 4 |
| | (i) ये छात्राः अनुशासनस्य पालनं कुर्वन्ति ते जीवने सफलाः भवन्ति । | | |
| | (ii) छात्राः**प्रातः व्यायामं स्नानं च कुर्वन्ति।** | | |
| | (iii) व्यायामेन शरीरं स्वस्थं भवति । | | |
| | **(इ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नचतुष्टयम्)** | 1x4 | 4 |
| | (i) (ग) मनुष्यस्य | | |
| | (ii) (क) स्वस्थम् | | |
| | (iii) (ख) छात्राः | | |
| | (iv) (ग) भवन्ति | | |
| | (v) (ग)स्वस्थं | | |
| | **खण्डः- ख (रचानात्मकं कार्यम्) 15 अंकाः** | | |
| 2. | **पत्रलेखनम्** | 1x5 | 5 |
| | **(i)** महोदय। | | |
| | **(ii)** सविनयम् | | |
| | **(iii)** अस्वस्था | | |
| | **(iv)** आगच्छम् | | |
| | **(v)** अहम् | | |
| 3. | (i) इदं चित्रम् **उद्यानस्य** अस्ति। | 1x5 | 5 |
| | (ii) चित्रे **बालकः** बालिका च स्तः। | | |
| | (iii) अत्र अनेकानि **पुष्पाणि** सन्ति। | | |
| | (iv) आकाशे **सूर्यः** उदितः। | | |
| | (v) एकः **वृक्षः** अस्ति । | | |

| | | | |
|---|---|---|---|
| 4. | (i) अहं सायं उद्यानं गच्छामि।<br>(ii) सायं उद्याने जनाः भ्रमन्ति बालाः क्रीडन्ति च।<br>(iii) सायं भ्रमणेन मनः शान्तं भवति ।<br>(iv) जनाः स्वास्थ्याय योगाभ्यासं कुर्वन्ति ।<br>(v) आम्, अहम् अपि चलितुम् इच्छामि।<br>**अथवा**<br>वने एका अजा घासं चरति । तत्र एकः (i)**व्याघ्रः** आगच्छति। अजा व्याघ्रं दृष्ट्वा भयभीता भवति।सा (ii) **दूरं** धावति। व्याघ्रः अजां मारयितुम् इच्छति । तदा एका बालिका (iii) **तत्र** आगच्छति।बालिका व्याघ्रस्य समीपे गच्छति प्रार्थनां करोति च 'अजां (iv) **मा** मारय। अहं अजां पालयामि। व्याघ्रस्य हृदये दया (v)**उत्पन्ना** भवति । सः अजां न मारयति । | 1x5 | 5 |
| 5. | **संधिः (केवलं प्रश्नद्वयम्)**<br>(i) _सूर्यास्तः<br>(ii) देव+आलयः<br>(iii) सहायतार्थम् | 1x2 | 2 |
| 6. | **शब्दरूपाणि (केवलं प्रश्नचतुष्टयम्)**<br>(i) छात्राः<br>(ii) बालकः<br>(iii) मित्रे<br>(iv) किम्<br>(v) तयोः | 1x4 | 4 |
| 7. | **सङ्ख्या (केवलं प्रश्नत्रयम्)**<br>(i) (क) द्वे<br>(ii) (ख) चत्वारः<br>(iii) (ख) द्वाविंशतिः<br>(iv) (ग) अष्टादश | 1x3 | 3 |
| 8 | (i) ह्+ अ + र् + इ +ण् + अः = हरिणः<br>(ii) त् +अ + त् +र्+अ = तत्र<br>(iii) अ + थ् + अ + व् + आ =अथवा<br>(iv)उ + च् + च् + ऐ +: = उच्चैः | ½x4 | 2 |
| 9. | **कारक-उपपदविभक्तिः (केवलं प्रश्नचतुष्टयम्)**<br>(क) परितः कारणात् द्वितीया विभक्तिः<br>(ख) उभयतः कारणात् द्वितीया विभक्तिः<br>(ग) प्रति कारणात् द्वितीया विभक्तिः<br>(घ) अभितः कारणात् द्वितीया विभक्तिः<br>(ङ) विना कारणात् द्वितीया विभक्तिः | 1x4 | 4 |

| | | | |
|---|---|---|---|
| 10 | **धातुरूपाणि (केवलं प्रश्नचतुष्टयम्)**<br>(i) स्तः।<br>(ii) अक्रीडत।<br>(iii) गमिष्यन्ति।<br>(iv) नमतः।<br>(v) खादिष्यति। | 1x4 | 4 |
| 11. | **प्रत्यय: (केवलं प्रश्नद्वयम्)**<br>(i) पठित्वा<br>(ii) हसित्वा<br>(iii) नम् +त्त्वा | 1x2 | 2 |
| 12. | **अव्ययपदानि (केवलं प्रश्नद्वयम्)**<br>(i) अहं श्लोकम् **अपि** गायामि ।<br>(ii) काकः **अत्र-तत्र** पश्यति ।<br>(iii) ईश्वरः **सर्वत्र** अस्ति। | 1x2 | 2 |
| 13. | **उपसर्ग: (केवलं प्रश्नद्वयम्)**<br>(i) आ+गच्छामि<br>(ii) प्रहरति<br>(iii)अनु+वदति | 1x2 | 2 |
| | **खण्ड:- घ (पठित-अवबोधनम्) 30 अंका:** | | |
| 14. | **(1) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) भारतमाता<br>(ii) युद्धक्षेत्रे<br>(iii) वीरबालकाः | 1/2x2 | 1 |
| | **(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>**(i)** गुञ्जनसक्सेना हंसराज महाविद्यालयस्य छात्रा आसीत् ।<br>**(ii)** गुञ्जनसक्सेना सैनिकान् अरक्षत् ।<br>**(iii)** गुञ्जनसक्सेना युद्धक्षेत्रे निर्भयं विमानम् अचालयत् । | 1x2 | 2 |
| | **(इ) निर्देशानुसारं उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) (ख) जननी<br>(ii) (क) अभवत्<br>(iii) (क) सा | 1x2 | 2 |
| 15. | **(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) प्रियवाक्यप्रदानेन<br>(ii) चन्दनम् | 1/2x2 | 1 |

| | | | |
|---|---|---|---|
| | (iii) दरिद्रता<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) चन्दनात् अधिकः शीतलः चन्द्रमा ।<br>(ii) साधुसङ्गतिः शीतला भवति।<br>(iii) प्रियवाक्यप्रदानेन सर्वे जन्तवः तुष्यन्ति ।<br>**(इ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) (ग) चन्दनम्<br>(ii) (क) शीतलम्<br>(iii) (ख) तुष्यन्ति | 1x2<br><br><br><br>1x2 | 2<br><br><br><br>2 |
| 16. | **(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) समुद्रतटम्<br>(ii) जलस्य<br>(iii) शार्क:<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) मानवान् शार्क: खादति ।<br>(ii) जले बहवः विचित्राः जन्तवः वसन्ति ।<br>(iii) शार्क - मत्स्यः लघुमत्स्यान् खादति। अयं मानवान् अपि च खादति ।<br>**(इ) निर्देशानुसारं उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) (आ) वयम्<br>(ii)(क) जन्तवः<br>(iii) **उपरि** | 1/2x2<br><br><br>1x2<br><br><br><br><br>1x2 | 1<br><br><br>2<br><br><br><br><br>2 |
| 17. | **प्रश्ननिर्माणम् (केवलं प्रश्नत्रयम्)**<br>(i) **<u>कः</u>** जलस्य उपरि आगच्छति ?<br>(ii) मूषकः **<u>किम्</u>** अकृन्तत् ?<br>(iii) **<u>कः</u>** दूरं गच्छति?<br>(iv) मृगाः **<u>कस्य</u>** मुखे न प्रविशन्ति ? | 1x3 | 3 |
| 18. | **अन्वयः-** कार्याणि (i) **<u>उद्यमेन</u>** हि सिध्यन्ति मनोरथैः (ii) **<u>न</u>** ।<br>सुप्तस्य (iii) **<u>सिंहस्य</u>** मुखे (iv) **<u>मृगाः</u>** न प्रविशन्ति। | 1x4 | 4 |
| 19. | **कथापूर्तिः**<br>काक : (i) **<u>मूषकः</u>** हरिणः कच्छपः च चत्वारि प्रियमित्राणि सन्ति ।<br>एतानि प्रियमित्राणि वने वसन्ति । एकदा हरिण : दूरम्(ii) **<u>गच्छति</u>** ।<br>सूर्यास्तः भवति परन्तु सः न आगच्छति । तस्य ( iii ) **<u>मित्राणि</u>** परस्परं | ½x4 | 2 |

| | | | |
|---|---|---|---|
| | वार्तालापम् कुर्वन्ति । एकः व्याधः हरिणं जालेन अबद्धत् । मूषकः जालम् कृन्तति । हरिणः(iv) <u>**मुक्तः**</u> भवति । | | |
| 20. | **शब्दार्थचयनम्**<br>(i) वचने ---------------भाषणे<br>(ii) कीडाङ्गणे---------- क्रीडाक्षेत्रे<br>(iii) संसारे ------------लोके | 1x3 | 3 |
| 21. | **विलोमपदमेलनम्**<br>(i) असत्यम् ... . . . . सत्यम्<br>(ii) सायंकालः . . . . प्रातःकालः<br>(iii) मुक्तः . . . . . . . बद्धः | 1x3 | 3 |

## आदर्श-प्रश्न-पत्रम्

### प्रश्नपत्र-प्रारूपम्

1. विषयाणां वर्गीकरणं

| उद्देश्यानि | अपठितावबोधनं | रचानात्मककार्यं | अनुप्रयुक्तव्याकरणम् | पठितावबोधनम् | योग: |
|---|---|---|---|---|---|
| अंकानां प्रतिशतम् | 12.50% | 18.75% | 31.25% | 37.50% | 100% |
| अंका: | 10 | 15 | 25 | 30 | 80 |

2. प्रश्नानं वर्गीकरणम्

| प्रश्नप्रकारा: | दीर्घोत्तराणि | लघुत्तराणि | अतिलघुत्तराणि | बहुवैकल्पिक-उत्तराणि | योग: |
|---|---|---|---|---|---|
| प्रश्नसंख्या: | 5 | 29 | 14 | 18 | 66 |
| अंका: | 22 | 29 | 11 | 18 | 80 |

3. विषयाधिभार:

| क्रमसंख्या | विषया: | अंका: |
|---|---|---|
| 1. | खण्ड: 'क' अपठित-अवबोधनम् | 10 |
| 2. | खण्ड: 'ख' रचनात्मक-कार्यं | 15 |
| 3. | खण्ड: 'ग' अनुप्रयुक्त-व्याकरणम् | 25 |
| 4. | खण्ड: 'घ' पठित-अवबोधनम् | 30 |
| | योग: | 80 |

4. खण्ड – योजना – क,ख,ग,घ

5. काठिन्य-निर्धारणम्

क. कठिनप्रश्ना:- 10% ख. सामान्यप्रश्ना: 50%

ग. सरल-प्रश्ना: 40%

6. उत्तराणाम् अनुमानिता: शब्दसीमा समय-संयोजनं च

| प्रश्नप्रकारा: | अनुमानित-शब्दसीमा | अनुमानित-अवधि: |
|---|---|---|
| दीर्घोत्तराणि | 50-80 शब्दा: | एकहोरा |
| लघुत्तराणि | 10-30 शब्दा: | एकहोरा |
| अतिलघुत्तराणि | एकपदात्मकानि | अर्धहोरा |
| बहुवैकल्पिक-उत्तराणि | एकपदात्मकानि | अर्धहोरा |